# ॥ वाल्मीकि रामायण॥

## ७ उत्तरकाण्ड

### अध्याय ३२

नर्मदा पुलिने यत्र राक्षसेन्द्रः स रावणः ।
पुष्पोपहारं कुरुते तस्माद्देशाददूरतः ॥१॥

अर्जुनो जयतां श्रेष्ठो माहिष्मत्याः पतिः प्रभुः ।
क्रीडिते सह नारीभिर्नर्मदातोयमाश्रितः ॥२॥

तासां मध्यगतो राज रराज स ततोऽर्जुनः ।
करेणूनां सहस्रस्य मध्यस्थ इव कुञ्जरः ॥३॥

जिज्ञासुः स तु बाहूनां सहस्रस्योत्तमं बलम् ।
रुरोध नर्मदा वेगं बाहुभिः स तदार्जुनः ॥४॥

कार्तवीर्यभुजासेतुं तज्जलं प्राप्य निर्मलम् ।
कूलापहारं कुर्वाणं प्रतिस्रोतः प्रधावति ॥५॥

समीननक्रमकरः सपुष्पकुशसंस्तरः ।
स नर्मदाम्भसो वेगः प्रावृड्काल इवाबभौ ॥६॥

स वेगः कार्तवीर्येण सम्प्रेषिट इवाम्भसः ।
पुष्पोपहारं तत्सर्वं रावणस्य जहार ह ॥७॥

रावणोऽर्धसमाप्तं तु उत्सृज्य नियमं तदा ।
नर्मदां पश्यते कान्तां प्रतिकूलां यथा प्रियाम् ॥८॥

पश्चिमेन तु तं दृष्ट्वा सागरोद्गारसंनिभम् ।
वर्धन्तमम्भसो वेगं पूर्वामाशां प्रविश्य तु ॥९॥

ततोऽनुद्भ्रान्तशकुनां स्वाभाव्ये परमे स्थिताम् ।
निर्विकाराङ्गनाभासां पश्यते रावणो नदीम् ॥१०॥

सव्येतरकराङ्गुल्या सशब्दं च दशाननः ।
वेगप्रभवमन्वेष्टुं सोऽदिशच्छुकसारणौ ॥११॥

तौ तु रावणसन्दिष्टौ भ्रातरौ शुकसारणौ ।
व्योमान्तरचरौ वीरौ प्रस्थितौ पश्चिमोन्मुखौ ॥१२॥

अर्धयोजनमात्रं तु गत्वा तौ तु निशाचरौ ।
पश्येतां पुरुषं तोये क्रीडन्तं सह योषितम् ॥१३॥

बृहत्सालप्रतीकशं तोयव्याकुलमूर्धजम् ।
मदरक्तान्तनयनं मदनाकारवर्चसं ॥१४॥

नदीं बाहुसहस्रेण रुन्धन्तमरिमर्दनम् ।
गिरिं पादसहस्रेण रुन्धन्तमिव मेदिनीम् ॥१५॥

बालानां वरनारीणां सहस्रेणाभिसंवृतम् ।
समदानां करेणूनां सहस्रेणेव कुञ्जरम् ॥१६॥

तमद्भुततमं दृष्ट्वा राक्षसौ शुकसारणौ ।
संनिवृत्तावुपागम्य रावणं तमथोचतुः ॥१७॥

बृहत्सालप्रतीकाशः कोऽप्यसौ राक्षसेश्वर ।
नर्मदां रोधवद्बद्ध्वा क्रीडापयति योषितः ॥१८॥

तेन बाहुसहस्रेण संनिरुद्धजला नदी ।
सागरोद्गारसङ्काशानुद्गारान्सृजते मुहुः ॥१९॥

इत्येवं भाषमाणौ तौ निशम्य शुकसारणौ ।
रावणोऽर्जुन इत्युक्त्वा उत्तस्थौ युद्धलालसः ॥२०॥

अर्जुनाभिमुखे तस्मिन्प्रस्थिते राक्षसेश्वरे ।
सकृदेव कृतो रावः सरक्तः प्रेषितो घनैः ॥२१॥

महोदरमहापार्श्वधूम्राक्षशुकसारणैः ।
संवृतो राक्षसेन्द्रस्तु तत्रागाद्यत्र सोऽर्जुनः ॥२२॥

नातिदीर्घेण कालेन स ततो राक्षसो बली ।
तं नर्मदा ह्रदं भीममाजगामाञ्जनप्रभः ॥२३॥

स तत्र स्त्रीपरिवृतं वाशिताभिरिव द्विपम् ।
नरेन्द्रं पश्यते राजा राक्षसानां तदार्जुनम् ॥२४॥

स रोषाद्रक्तनयनो राक्षसेन्द्रो बलोद्धतः ।
इत्येवमर्जुनामात्यानाह गम्भीरया गिरा ॥२५॥

अमात्याः क्षिप्रमाख्यात हैहयस्य नृपस्य वै ।

युद्धार्थं समनुप्राप्तो रावणो नाम नामतः ॥ २६॥

रावणस्य वचः श्रुत्वा मन्त्रिणोऽथार्जुनस्य ते ।
उत्तस्थुः सायुधास्तं च रावणं वाक्यमब्रुवन् ॥ २७॥

युद्धस्य कालो विज्ञातः साधु भोः साधु रावण ।
यः क्षीबं स्त्रीवृतं चैव योद्धुमिच्छामि नो नृपम् ।
वाशितामध्यगं मत्तं शार्दूल इव कुञ्जरम् ॥ २८॥

क्षमस्वाद्य दशग्रीव उष्यतां रजनी त्वया ।
युद्धश्रद्धा तु यद्यस्ति श्वस्तात समरेऽर्जुनम् ॥ २९॥

यदि वापि त्वरा तुभ्यं युद्धतृष्णासमावृता ।
निहत्यास्मांस्ततो युद्धमर्जुनेनोपयास्यसि ॥ ३०॥

ततस्ते रावणामात्यैरमात्याः पार्थिवस्य तु ।
सूदिताश्चापि ते युद्धे भक्षिताश्च बुभुक्षितैः ॥ ३१॥

ततो हलहलाशब्दो नर्मदा तिर आबभौ ।
अर्जुनस्यानुयात्राणां रावणस्य च मन्त्रिणाम् ॥ ३२॥

इषुभिस्तोमरैः शूलैर्वज्रकल्पैः सकर्षणैः ।
सरावणानर्दयन्तः समन्तात्समभिद्रुताः ॥ ३३॥

हैहयाधिपयोधानां वेग आसीत्सुदारुणः ।
सनक्रमीनमकरसमुद्रस्येव निस्वनः ॥ ३४॥

रावणस्य तु तेऽमात्याः प्रहस्तशुकसारणाः ।
कार्तवीर्यबलं क्रुद्धा निर्दहन्त्यग्नितेजसः ॥ ३५॥

अर्जुनाय तु तत्कर्म रावणस्य समन्त्रिणः ।
क्रीडमानाय कथितं पुरुषैर्द्वाररक्षिभिः ॥ ३६॥

उक्त्वा न भेतव्यमिति स्त्रीजनं स ततोऽर्जुनः ।
उत्ततार जलात्तस्माद्गङ्गातोयादिवाञ्जनः ॥ ३७॥

क्रोधदूषितनेत्रस्तु स ततोऽर्जुन पावकः ।
प्रजज्वाल महाघोरो युगान्त इव पावकः ॥ ३८॥

स तूर्णतरमादाय वरहेमाङ्गदो गदाम् ।
अभिद्रवति रक्षांसि तमांसीव दिवाकरः ॥ ३९॥

बाहुविक्षेपकरणां समुद्यम्य महागदाम् ।
गारुणं वेगमास्थाय आपपातैव सोऽर्जुनः ॥ ४०॥

तस्य मर्गं समावृत्य विन्ध्योऽर्कस्येव पर्वतः ।
स्थितो विन्ध्य इवाकम्प्यः प्रहस्तो मुसलायुधः ॥ ४१॥

ततोऽस्य मुसलं घोरं लोहबद्धं मदोद्धतः ।
प्रहस्तः प्रेषयन्क्रुद्धो ररास च यथाम्बुदः ॥ ४२॥

तस्याग्रे मुसलस्याग्निरशोकापीडसंनिभः ।
प्रहस्तकरमुक्तस्य बभूव प्रदहन्निव ॥ ४३॥

आधावमानं मुसलं कार्तवीर्यस्तदार्जुनः ।
निपुणं वञ्चयामास सगदो गजविक्रमः ॥ ४४॥

ततस्तमभिदुद्राव प्रहस्तं हैहयाधिपः ।
भ्रामयाणो गदां गुर्वीं पञ्चबाहुशतोच्छ्रयाम् ॥ ४५॥

तेनाहतोऽतिवेगेन प्रहस्तो गदया तदा ।
निपपात स्थितः शैलो वज्रिवज्रहतो यथा ॥ ४६॥

प्रहस्तं पतितं दृष्ट्वा मारीचशुकसाअरंआ् ।
समहोदरधूम्राक्षा अपसृप्ता रणाजिरात् ॥ ४७॥

अपक्रान्तेष्वमात्येषु प्रहस्ते च निपातिते ।
रावणोऽभ्यद्रवत्तूर्णमर्जुनं नृपसत्तमम् ॥ ४८॥

सहस्रबाहोस्तद्युद्धं विंशद्बाहोश्च दारुणम् ।
नृपराक्षसयोस्तत्र आरब्धं लोमहर्षणम् ॥ ४९॥

सागराविव सङ्क्षुब्धौ चलमूलाविवाचलौ ।
तेजोयुक्ताविवादित्यौ प्रदहन्ताविवानलौ ॥ ५०॥

बलोद्धतौ यथा नागौ वाशितार्थे यथा वृषौ ।
मेघाविव विनर्दन्तौ सिंहाविव बलोत्कटौ ॥ ५१॥

रुद्रकालाविव क्रुद्धौ तौ तथा राकसार्जुनौ ।
परस्परं गदाभ्यां तौ ताडयामासतुर्भृशम् ॥ ५२॥

वज्रप्रहारानचला यथा घोरान्विषेहिरे ।
गदाप्रहारांस्तद्वत्तौ सहेते नरराक्षसौ ॥ ५३॥

यथाशनिरवेभ्यस्तु जायते वै प्रतिश्रुतिः ।
तथा ताभ्यां गदापातैर्दिशः सर्वाः प्रतिश्रुताः ॥ ५४॥

अर्जुनस्य गदा सा तु पात्यमानाहितोरसि ।
काञ्चनाभं नभश्चक्रे विद्युत्सौदामनी यथा ॥ ५५॥

तथैव रावणेनापि पात्यमाना मुहुर्मुहुः ।

अर्जुनोरसि निर्भाति गदोल्केव महागिरौ ॥ ५६॥

नार्जुनः खेदमाप्नोति न राक्षसगणेश्वरः ।
सममासीत्तयोर्युद्धं यथा पूर्वं बलीन्द्रयोः ॥ ५७॥

शृङ्गैर्महर्षभौ यद्वद्दन्ताग्रैरिव कुञ्जरौ ।
परस्परं विनिघ्नन्तौ नरराक्षससत्तमौ ॥ ५८॥

ततोऽर्जुनेन क्रुद्धेन सर्वप्राणेन सा गदा ।
स्तनयोरन्तरे मुक्ता रावणस्य महाहवे ॥ ५९॥

वरदानकृतत्राणे सा गदा रावणोरसि ।
दुर्बलेव यथा सेना द्विधाभूतापतत्क्षितौ ॥ ६०॥

स त्वर्जुनप्रमुक्तेन गदापातेन रावणः ।
अपासर्पद्धनुर्मात्रं निषसाअद च नि स् तनन् ॥ ६१॥

स विह्वलं तदालक्ष्य दशग्रीवं ततोऽर्जुनः ।
सहसा प्रतिजग्राह गरुत्मानिव पन्नगम् ॥ ६२॥

स तं बाहुसहस्रेण बलाद्गृह्य दशाननम् ।
बबन्ध बलवान्राजा बलिं नारायणो यथा ॥ ६३॥

बध्यमाने दशग्रीवे सिद्धचारणदेवताः ।
साध्वीति वादिनः पुष्पैः किरन्त्यर्जुनमूर्धनि ॥ ६४॥

व्याघ्रो मृगमिवादाय सिंहराड् इव दन्तिनम् ।
ररास हैहयो राजा हर्षादम्बुदवन्मुहुः ॥ ६५॥

प्रहस्तस्तु समाश्वस्तो दृष्ट्वा बद्धं दशाननम् ।
सह तै राकसैः क्रुद्ध अभिदुद्राव पार्थिवम् ॥ ६६॥

नक्तञ्चराणां वेगस्तु तेषामापततां बभौ ।
उद्धूत आतपापाये समुद्राणामिवाद्भुतः ॥ ६७॥

मुञ्च मुञ्चेति भाषन्तस्तिष्ठ तिष्ठेति चासकृत् ।
मुसलानि च शूलानि उत्ससर्जुस्तदार्जुने ॥ ६८॥

अप्राप्तान्येव तान्याशु असम्भ्रान्तस्तदार्जुनः ।
आयुधान्यमरारीणां जग्राह रिपुसूदनः ॥ ६९॥

ततस्तैरेव रक्षांसि दुर्धरैः प्रवरायुधैः ।
भित्त्वा विद्रावयामास वायुरम्बुधरानिव ॥ ७०॥

राक्षसांस्त्रासयित्वा तु कार्तवीर्यार्जुनस्तदा ।
रावणं गृह्य नगरं प्रविवेश सुहृद्वृतः ॥ ७१॥

स कीर्यमाणः कुसुमाक्षतोत्करैर्
द्विजैः सपौरैः पुरुहूतसंनिभः ।
तदार्जुनः सम्प्रविवेश तां पुरीं
बलिं निगृह्यैव सहस्रलोचनः ॥ ७२॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com